# त्रयोदशः पाठः

CFMRBV

## काकः



एकः काकः तृषापीडितः

जलं नालभत दूरे दूरे ।

वृक्षाद् वृक्षं गतः वराकः

ग्रामे ग्रामे नगरे नगरे ।। 1 ।।

एकं सहसा घटं दृष्टवान्

घटे जलं दृष्टं बहुदूरे ।

खण्डं खण्डं पाषाणानां

क्षिप्तवान् काकः जलमध्ये ।।2।।

घटकण्ठं सम्प्राप्तं नीरं

पीत्वा सन्तुष्टः खलु काकः ।

बुद्धिपूर्वकं यत्नं कुरुते

वद न सफलतां लभते का? कः? ।।3।।

शब्दार्थः

**काकः**=कौआ **तृषापीडितः**=प्यास से व्याकुल **न अलभत**=नहीं पाया **वृक्षात्**=वृक्ष से (पेड़ से) **वराकः**=बेचारा,**सहसा**=अचानक (एकाएक)**खण्डम्**=टुकड़ा। **पाषाणानाम्**=पत्थरोंके **क्षिप्तवान्**=डाला **दृष्टवान्**=देखा **का**=कौन (स्त्री) **कः**=कौन (पुरुष)।

**अन्वयः**

(1) एकः तृषापीडितः काकः दूरे-दूरे जलं न अलभत।

(सः) वराकः वृक्षाद् वृक्षं गतः, ग्रामे ग्रामे नगरे नगरे (गतः)।

(2) (सः) सहसा एकं घटं दृष्टवान्। घटे जलं बहुदूरे दृष्टम्।

काकः पाषाणानां खण्डं खण्डं जलमध्ये क्षिप्तवान्।

(3) नीरं घटकण्ठं सम्प्राप्तम्। काकः (तत्) पीत्वा सन्तुष्टः।

बुद्धिपूर्वकं यत्नं कुरुते का कः सफलतां न लभते?

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

तृषापीडितः, वृक्षाद,् पाषाणानाम्,

दृष्टवान्, क्षिप्तवान्, सन्तुष्टः,

सम्प्राप्तम्, बुद्धिपूर्वकम्, नालभत।

**2. एकपदेन उत्तरत-**

यथा- तृषापीडितः कः आसीत्? काकः

(क) सः दूरे दूरे किं न अलभत?

(ख) वृक्षात् वृक्षं कः गतवान्?

(ग) घटे बहुदूरे किं दृष्टम्?

(घ) काकः पाषाणखण्डान् कुत्र अक्षिपत्?

**3. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

एकः, नालभत, दृष्टम्, अक्षिपत्, घटम्, जलम्।

यथा- एकः काकः तृषापीडितः।

(क) जलं दूरे दूरे.................................. ।

(ख) एकं सहसा................................ दृष्टवान् ।

(ग) घटे जलं बहुदूरे .................................. ।

(घ) स काकः जलमध्ये पाषाणखण्डम् .....................।

(ड.) काकः ......................... पीत्वा सन्तुष्टः जातः।

**4. संस्कृते अनुवादं कुरुत-**

(क) एक कौआ प्यास से व्याकुल था।

(ख) वह जल के लिए वृक्ष से वृक्ष पर गया।

(ग) सहसा उसे एक घड़ा दिखायी पड़ा।

(घ) घड़े में पानी बहुत दूर था।

(ङ) उसने घड़े में पत्थर के टुकड़े डाले।

**5. चित्राणि दृष्ट्वा वाक्यानि रचयत-**



यथा- एकः मयूरः अस्ति।



..........................................



...............................



........................



................



**6. उचितम् उत्तरपदं रेखांकितं कुरुत-**

यथा- तृषापीडितः कः आसीत् ? (काकः, वानरः, गजः)।

(क) दूरे दूरे किं नालभत ? (अन्नम्, दुग्धम्, जलम्)।

(ख) वृक्षाद् वृक्षं कः गतः ? (मयूरः, उलूकः, काकः)।

(ग) काकः सहसा किं दृष्टवान् ? (शरावम्, घटम्, कटाहम्)।

(घ) काकः घटे किं क्षिप्तवान् ? (पाषाणखण्डम्, अन्नम्, जलम्)।

**7. सप्तमीविभक्तिकपदानि चित्वा लिखत-**

यथा- ग्रामे, .......................................... .............................................

.......................................... ..............................................,

**शिक्षण-सङ्केतः**

श्लोकानां सामूहिकं गायनं कारयत।